लुंठ्वा हृपाशाकंठं सुखमन्वभूदित्यर्थः ॥८४॥ तत्र स्वयंवरे समगुणयोस्तुल्यगुणयोरिंदुमतीरघुनंदनयोर्योगेन प्रीतिर्येषां ते तथोक्ताः समगुणयोगप्रीतयः पौराः पुरे भवा जना इयमजं संगता इं
दुमती मेघैर्मुक्तं शशिनं शरच्चंद्रमुपगता कौमुदी अनुरूपं सदृशं जलनिधिमवतीर्णा प्रविष्टा जह्नुकन्या भागीरथी तत्सदृशीत्यर्थः इत्येवं नृपाणां श्रवणयोः कटु परुषं एकं अविसं
वादि वाक्यमेकवाक्यं विवव्रुः ॥८५॥ एकतः एकस्मिन्पक्षे प्रमुदितो हृष्टो वरस्य पक्षो वर्गो यस्य तत्तथोक्तं अन्यतः अन्यस्मिन्पक्षे वितानं शून्यं भग्नाशत्वादप्रहृष्टमित्यर्थः क्षितिपतिमंडलं उषसि
॥ प्रभाते प्रफुल्लपद्मं कुमुदवनेन प्रतिपन्ना निद्रा यत्र निमीलनं यस्य सरस्तुल्यमासीत् ॥८६॥ इति श्रीमल्लिनाथसूरिविरचितायां संजीविनीसमाख्यायां रघुवंशटीकायां षष्ठः सर्गः ६॥

प: कृकुत्स्थेन वलस्य जस्य ... तेनेनता इ तेन विभज्य शिपन्ने अंगदे सेंद्र मंगदे न संकोपन संघट्यन् संघर्षयन् ... म: ... त्रिभुवने युद्धे विपाभस्य च गोत्र भिद ... सार्द्धमास
नत्यार्थासनं अर्द्धं ... नुस कामितिसमास: अधितष्ठौ अधितिष्ठितवान् स्यादि ... न चाप्य ... स्यासभ ववापे विपुलं नेकेवलं मेरो ... धारिणम् ... स्यककुद मारूढ ... किल निजरूप
धारिणो पीडस्या ... सिनमित्यपि ... दार्थ: अथवा ... आसनमपीत्यपर न्व: ७३ ... निर्मर: यशा: कुलप्रदीपको दिलीप इति न पति ... स्यककुत्स्यकुले जात: ... शक्राभ्य ... स्या
विनिवृत्तयेन ... वीना: शतक्रतवो यस्य ... कुत्स्य ... न अतिष्ठत ... स्वशोभिनवा ... नित्यर्थ: ७४ ... दिलीपमशीघास
सति ... तिविल ... विहार: ... गता ... वाशिनी नाम तागमनानां ... नर्तकीम ... विदग्ध ... विनिता ... नर्तकी ... इत्यमर: अंशुका निव ... गाणि वाडो
पिनास्ते ... हारवा ... तुकार ... तस्याज्ञामि ... भयं स्यात: अजाइत्यपि: अर्द्ध ... अति विग्रह: समप्रविभागे ... कदेशसमास: ७५ ... विश्वजितेना ममर
... वर्षस्यात्मन ... संप ... संघ ... देव ... खांभिप ... ति ... वंगोत्र भिदो ... ७६ जात: कुलेनाय किलेंद्र कीर्ति: कुलप्रदीपेन पतिर्दिलीप: अतिष्टदेकोन ...
शतक्रतु ... त्याविनिवृत्तयेव: ७७ यस्मिन् ... शतिवाशिनी ... विहार ... मतानां ... पदं भुकानि कोन वय ... दाहराय ... ७८ पुत्रो रघुस्तस्य पर
मशास्तिमत्र ... विभूतिः ... चतुर्दिगावर्जित संभृतां ... करोद्भूतं ७९ आरूढ ... नुद्धीनशीर्ष ... भुजंगमानां ... वसति ... अविष्टं ... नयस्यपन ... राजपर: प
रिपेतु ... ८० असौ कुमारस्तमजोनुजातत्रिविष्टपस्येव पतिं जयंत: गुर्वी धुरं यो भुवनस्य पित्रा धुर्येण दम्य: सदृशं विभर्ति ८१ कुलेन कांत्या वयसा नवेन गुणैश्च तैस्तैर्विनय ...
क्तेता: अथोक्ता अनुष्ठा तस्य दिलीपस्य पुत्रो रघु: ... पालयति ... रघु: ... दिग्भाग ... वर्जिता ... संभृता समग्रा ... तां ... चतुर्दिगावर्जित संभृतां यो ... किरति संपदं मत्याग्भेन।
... यस्या ... कगतिर्विग्र ... स्यमस्य ... दित्वा ... ८१ ... दीनत्रास ... दधी न दितिर्नरेंद्र ... भुजो ... अर्थ: भुजंगमानां ... निपाल ... प्रविष्ट ... आदिकं गतं आस्य सर्व
विस्तारपीत्यर्थ: ... काल ... याप ... अर्थ: ... काले ... नेन पति ... स्तेन ... ८२ आत्मजातस्य: कुमारस्त्रिविष्टप
स्य स्वर्गस्य पतिमिंद्र जयंत इव जयंत: पाकशासनिरित्यमर: ... रघुमनुजात: ... ततो जात इत्यर्थ: ... जातो ... पितृ ... कर्म ... स्य ... जीव ... तिभ्य ...
... अपत्य ... पुत्रे ... दर्प ... गुर्वी भुवनस्य धुरं ... पित्रा ... दम्य: ... पालन ... धुर्येण ...
... तस्य ... ८३ कुलेन ... नवेन ... विनय: ... अपा ... कांत्या ... रघुरनुरूपमनुजातं ... बहुनार तं ...
... तनुसंग ... ब्रवीषि ... सममय: आर्यतिष्ठेत्यर्थ: ८४

काचित्प्रासादिकया अलक्तकमालंबितं रंजनार्थं धृतं द्रवरागमेव आर्द्रालक्तकमेव अग्रं चासौ पादश्च अग्रपाद इति समानाधिकरणसमासः हस्ताग्रहस्तयोर्गुणगुणिनोर्भेदो वि-
निवामनः समाक्षिप्याकृष्य उत्सृष्टलीलागतिः त्यक्तमंदगमना सती आगवाक्षं पर्यंतं मदवीमलक्तकांकां लाक्षांकितां चकार ७ अपरा स्त्री विलोचनं दक्षिणमंजनेन संभाव्यालंकृत्य
तद्वंचितं तेनांजनेन वर्जितं वामनेत्रं यस्याः सा सती तथैव शलाकामंजनकर्णिकां वहंती वातायनसंनिकर्षं गवाक्षसमीपं ययौ दृष्टिरागप्रसंगात्सुक्रमयोतनार्थं स्ववामेक्षिण्येवमिनु-
प्यांजनं नश्रेति भ्रुतेः ८ अन्या स्त्री जालांतरप्रेषितदृष्टिः गवाक्षप्रेरितदृष्टिः सती प्रस्थानेन गमनेन भिन्नां त्रुटितां नीवीं वसनग्रंथिं नीवी परिपणे ग्रंथौ स्त्रीकटीवसनेवासनीति विश्वः न बबंध किं-
तु नाभिप्रविष्टा आभरणानां प्रभा यस्य तेन प्रभैव नाभेराभरणमभूदिति भावः हस्तेन वासोऽवलंब्य गृहीत्वा तस्थौ ९ सत्वरमुत्थितायाः कस्याश्चिद्रशना अर्धाचिता अर्धगुंफिता अर्धाचिता दुर्निमिते स-
भ्रमाद्दुर्न्यस्ते डुमिञ् प्रक्षेपणे इति धातोः कर्मणि क्तः पदे पदे प्रतिपदं वीप्सायां द्विर्भावः गलंती गलद्गुणा सती रसनामेखला तदानीमंगुष्ठमूले अर्पितं गमितं सूत्रमेव शेषो यस्याः सा आसीत् १० तदानी।

प्रासादिकालंबितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव उत्सृष्टलीलागतिरागवाक्षादलक्तकांकां पदवीं ततान ७ विलोचनं दक्षिणमंजनेन संभाव्य तद्वंचितवामनेत्रा तथैव वाता-
यनसंनिकर्षं ययौ शलाकामपरा वहंती ८ जालांतरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबंध नीवीं नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलंब्य वासः ९ अर्धाचिता सत्वरमुत्थिता-
याः पदे पदे दुर्निमिते गलंती कस्याश्चिदासीद्रसना तदानीमंगुष्ठमूलार्पितसूत्रशेषा १० तासां मुखैरासवगंधगर्भैर्व्याप्तांतराः सांद्रकुतूहलानां विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभ-
रणा इवासन् ११ ता राघवं दृष्टिभिरापिबंत्यो नार्यो न जग्मुर्विषयांतराणि तथा हि शेषेंद्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा १२ स्थाने वृता भूपतिभिः परोक्षैः स्वयंवरं साधुममंस्त भोज्या
पद्मेव नारायणमन्यथासौ लभेत कांतं कथमात्मतुल्यं १३ परस्परेण स्पृहणीयशोभं न चेदिदं द्वंद्वमयोजयिष्यत् अस्मिन्द्वये रूपविधानयत्नः पत्युः प्रजानां वितथोऽभविष्यत् १४ सांद्रकुतूहलानां तासां

स्त्रीणां आसवगंधो गर्भे येषां तैर्विलोलानि नेत्राण्येव भ्रमरा येषां तैर्मुखैर्व्याप्तांतराः छन्नावकाशाः गवाक्षाः सहस्रपत्राभरणा इवासन् कमलालंकृता इव स्थिता इत्यर्थः ११ ता नार्यो रघोरपत्यं राघवमजं त।
स्यापत्यमण् दृष्टिभिरापिबंत्यो नितरां पश्यंत्यो विषयांतराणि ततोऽन्यविषयान् न जग्मुर्न विदुरित्यर्थः तथा हि आसां नारीणां शेषेंद्रियवृत्तिः सर्वात्मना स्वरूपकार्त्स्न्येन चक्षुः प्रविष्टेव चक्षुरितराणींद्रिया-
णि स्वातंत्र्येणाग्रहणाशक्तेः चक्षुरेव प्रविश्य कौतुकात्स्वमंमथेन मुपलभंते किमुत अन्यथा स्वविषमाधिगमः किं न स्यादिति भावः १२ शृंगारकथा श्रोत्रसुखाः कुमारस्तिवसंतिताः कथयति भोज्या इंदुमती परोक्षैरदृष्टैर्भूपतिभिर्वृता
म्मैवं भव्ये यमिति प्रार्थिता सती स्वयंवरं साधु हितममंस्त मेने न तु परोक्षमेकं चिदर्थितं मनस्थाने युक्तमेतद्वक्तुः अन्यथा स्वयंवराभावे नासौ इंदुमती पद्मा लक्ष्मीः नारायणमिव आत्मतुल्यं अनुरूपं कांतं कथं
लभेत न लभेतेत्यर्थः स्वयं विवेकाऽसौ काम्यहिते भावः १३ स्पृहणीयशोभं सर्वाशास्यसौंदर्यम् इदं द्वंद्वं मिथुनं द्वंद्वं रहस्ये निपातः परस्परेण न योजयिष्यत् चेन्न योजयेत् इति अजानां पत्युर्विधातुरस्मिन् द्वये रूपविधानयत्नः सौंदर्यनिर्माणप्रयत्नो वितथोऽ-

ऐनमः भमेमहानिपीपैकंमुहुरन्यंपयोधरंमार्गसिवास्तमाज्ञोक्यस्यामेनादिदंयती १ अथविदर्भनाथोभोजःसदृशेनोपयंत्रावरेणयुक्तांतांअतस्वसा
तान्तप्रत्यसंसाज्ञास्यत्यक्तुस्यबोभिरयमरः स्कंदेनपुत्रांदेवसेनामिव देवसेनानामदेवपुत्रीस्कंदपत्नीनामिवदिपिनांस्वसारंभगिनीमादायपुरीलापुरप्रवे
शाभिमुखोबभूव १ भोजस्यराज्ञोगोत्रापत्यंस्त्रीभोज्यामिंदुमतीअतिस्य थमनोरथत्वात् रूपकुत्राकृतिसुवेषेषुनेपथ्येषुचसाम्यरूपाः तृपोनिनिंदकः।
किंचविभांतिप्रलाप्यवत्रादपस्त्वमंदभासःक्षीणकांतयःपृथिवीक्षितोनृपाअपिसेनानिवेशान्शिविराणिजग्मुः २ननुकुतस्तेपुष्पंतातआह तत्रस्वयंवरमात्रेशब्दाकुंठ्रायाः
संनिधिरेवसान्निध्यंतस्ययोगात्सद्भावाद्धेतोःस्वयंवरस्यशोभकृतांविप्रकारिणामभावःकिलेतिस्वयंवरविधानकाःशब्दाविनाशयनइस्यागमसूदनार्थं तेनहेतुनाकाकु
स्थमुद्दिश्यसमस्तेपिसदेशोपिक्षितिपाललोकःशशामनाश्चभूवत् ३ पावत्तावत्ताकाल्पहृत्यमरःतावत्सकीर्णिःसाकल्येनप्रसारिताअभिनवाउपचाराःपुष्पप्रकारादयोयस्य

अथोपयंत्रासदृशेनयुक्तांस्कंदेनसाक्षादिवदेवसेनां स्वसारमादायविदर्भनाथःपुरप्रवेशाभिमुखोबभूव १ सेनानिवेशान्पृथिवीक्षितोपिजग्मुर्विभातग्रह
वेशेषु २ मंदभासःभोज्यांप्रतिव्यर्थमनोरथत्वाद्रूपेषुवेषेषुचसाम्यरूपाः २ सान्निध्ययोगात्किलतत्ररत्याःस्वयंवरक्षोभकृतामभावः काकुत्स्थमुद्दिश्यसमत्सरोपिशशामतेन
क्षितिपाललोकः ३ तावत्प्रकीर्णाभिनवोपचारमिंद्रायुधद्योतिततोरणांकं वरःसवध्वासहराजमार्गंप्रापध्वजच्छायनिवारितोष्णं ४ ततस्तदालोकनतत्परा
णां सौधेषुचामीकरजालवत्सु बभूवुरित्थंपुरसुंदरीणांत्यक्तान्यकार्याणिविचेष्टितानि ५ आलोकमार्गंसहसाव्रजंत्याकयाचिदुद्वेष्टनवांतमाल्यः बद्धुंनसंभावित
एवतावत्करेणरुद्धोपिचकेशपाशः ६ तेनयोक्तंदृष्ट्वापुधानीवद्योतितानिप्रकाशितानितोरणान्यंकश्चिह्नानियस्यतंध्वजानांछायाध्वजच्छायंछाययावारितमुष्णंयस्यतं इतिनपुंसकत्वंसेननिवारि
तमुष्णंतापोयस्यतंराजमार्गंसवरोवोढावध्वासहप्रापविवेश ४ ततश्चामीकरजालवत्सुसौवर्णगवाक्षयुक्तेषुसौधेषुतस्यानस्यालोकनेतत्पराणामासक्तानांपुरसुंदरीणामित्थंवक्ष्यमाणप्रकाराणित्यक्तान्यका
र्याणिकेशबंधनादीनियेषुतानिविचेष्टितानिव्यापाराःबभूवुः ५ तान्येवाहपंचभिःश्लोकैः सहसाआलोकमार्गंव्रजंत्याकयाचिदुद्वेष्टनवांतमाल्यःउद्वेष्टनेनबंधविश्लेषेणांतंमाल्यंयस्यसःकरेणरुद्धोपिनतोपि
नकेशपाशःकेशकलापःपाशःपक्ष्यादिभ्यश्चहस्तादिभ्यश्चकलापार्थःकचात्परेइत्यमरः तावदालोकमार्गप्राप्तिपर्यंतं बद्धुंबंधनार्थंनसंभावितःनसंचिंतः ॥६॥ श्रीगुरुचरणकमलेभ्योनमः॥ श्रीरामः॥ ॥॥

र.टी.प. ७५

७ सर्ग

अपांगेषुनेत्रप्रांतेषुप्रतिसारितानिप्रवर्तितानिक्रियायोर्निरीक्षणलक्षणयोः समापत्त्यासंगत्यानिवर्तितान्यन्योन्यस्मिन्लोलानिसतृष्णानिलोलश्चलसतृष्णयोरित्यमरः दंप
त्योर्विलोचनानिमनोज्ञांरम्यांह्रियायंत्रणांसंकोचमानशिरेप्रापुः २० तन्मिथुनमुदर्चिषउन्नतज्वालस्यकृशानोःप्रक्रमणात्प्रदक्षिणीकरणा
च्चकासेकथमिवमेरोरुपांतेषुवर्तमानमन्योन्यसंसक्तंसंगतंमिथुनमन्योन्याविरहितंअहश्चत्रियामाचाहस्त्रियामंतदिवमितिस
माहारेद्वंद्वैकवद्भावः २१ नितंबेनगुर्वीअलघ्वीदुर्दृष्टेःलघुनेत्यगुर्वीतिप्याप्तः विधातृप्रतिमेनब्रह्मतुल्येनगुरुणायाजकेनप्रयुक्ताजुहुधीतिनियुक्तामत्तचकोरस्येवनेत्रेयस्याःसालज्जावतीसा
वधूरग्नौलाजविसर्गंचकार २२ हविषआज्यादेःशमीपल्लवानांलाजानांगंधोऽस्यास्तीतितथोक्तःपुण्योऽपि... लाजानावपतीति कासायपुरुषो धूमः कृशानोःपावका
दुदयायकपोलेसंसर्पिणीशिखायस्यसतथोक्तःसधूमस्तस्यावध्वाःमुहूर्तंकर्णोत्पलतांप्रपेदे २३ तद्वधूमुखमाचारेणप्राप्तात्धूमग्रहणात्अंजनस्यक्लेदःअंजनमिश्राबाष्पोदकेनतेनस

तयोरपांगप्रतिसारितानिक्रियासमापत्तिनिवारितानि ह्रीयंत्रणामानशिरेमनोज्ञामन्योन्यलोलानिविलोचनानि २० प्रदक्षिणप्रक्रमणात्कृशानोरुदर्चिषस्तन्मिथुनंचकासे मेरोरु
पांतेष्विववर्तमानमन्योन्यसंसक्तमहस्त्रियामं २१ नितंबगुर्वीगुरुणाप्रयुक्तावधूर्विधातृप्रतिमेनतेन चकारसामत्तचकोरनेत्रालज्जावतीलाजविमोक्षमग्नौ २२ हविःशमीपल्लवला
जगंधिःपुण्यःकृशानोरुदियायधूमः कपोलसंसर्पिशिखःसतस्यामुहूर्तकर्णोत्पलतांप्रपेदे २३ तदंजनक्लेदसमाकुलाक्षंप्रम्लानबीजांकुरकर्णपूरं वधूमुखंपाटलगंडलेख
माचारधूमग्रहणाद्बभूव २४ तौस्नातकैर्बंधुमताचराज्ञापुरंध्रिभिश्चक्रमशःप्रयुक्तं कन्याकुमारौकनकासनस्थावार्द्राक्षतारोपणमन्वभूतां २५ इतिस्वसुर्भोजकुलप्रदीपःसंपाद्य
पाणिग्रहणंसराजा महीपतीनांपृथगर्हणार्थंसमादिदेशाधिकृतानधिश्रीः २६ लिंगैर्मुदःसंवृतविक्रियास्तेह्रदाःप्रसन्नाइवगूढनक्राः वैदर्भमामंत्र्ययुयुस्तदीयांप्रत्यर्प्यपूजामुपदाछलेन २७

माकुलाक्षंप्रम्लानोबीजांकुरएवकर्णपूरोयस्यतत्पाटलगंडलेखमरुणगंडस्थलंचबभूव २४ कनकासनस्थौतौकन्याकुमारौस्नातकैर्गृहस्थविशेषैःस्नातकस्त्वाप्लुतोव्रतीत्यमरः बंधुमताबंधुपुरःसरेणेत्यर्थः
राज्ञाचपुरंध्रिभिःपतिपुत्रवतीभिर्नारीभिश्चक्रमशःप्रयुक्तंस्नातकादीनांपूर्वपूर्ववैशिष्ट्यात्क्रमेणकृतमार्द्रैरक्षतानामारोपणमन्वभूतां २५ अधिश्रीरधिकसंपन्नोभोजकुलप्रदीपःसराजाइतिस्वसुःपाणिग्रहणं
विवाहंसंपाद्यमहीपतीनांपृथगेकैकशोऽर्हणार्थंपूजार्थमधिकृतान्समादिदेशाज्ञापयामास २६ मुदोलिंगैराकारैःपिहितसंतोषचिह्नैःसंवृतविक्रियागूहितविकाराअतएवप्रसन्नाबहिर्निर्मलाःगूढनक्राःअंतर्लीननक्राःह्र
बद्धश्रीः [illegible]

ह्रदाइवस्थितास्तेनृपावैदर्भमामंत्र्यापृच्छ्येतितदीयांवैदर्भीपूजांउपायनछलेनोपायनमिषे
णप्रत्यर्प्ययुः॥२७॥

रम ७५

रतिस्मरौ यौ नित्यसहचरौ विलमिति प्राप्तः तुर्यं नातो वेवस्थं च अयं च वक्ष्यौ दंपती एतद्रूपेणात्मनो कुतः तयादि प्रसिद्धमेवेतत् यदिदं वाजाराज्ञो सहस्रेषु मध्ये तत्पतिये ब्यासामकारणाद् इति भावः
आत्मप्रतिरूपं स्वतुल्यमेव तुल्यसंकाशानी कायाः प्रतिरूपकाइत्यादि दंडीगता आशंसित तदपि कथं जानमत आह मनोहि जन्मांतरसंगतिं जानाति निःप्रत्यभिज्ञावासनावशादनुभूतार्थेषु मनः
प्रवृत्तिरस्तीत्युक्तं जन्मांतरसाहचर्यमेवात्र प्रवर्तकमित्यर्थः १५ अंततस्यानेदृष्टे सा फलकप्रकारेणापौरवधूमुखेभ्यः उद्धृताः श्रोत्रयोः सुखाः मधुराः सुखश्रवा विशेष्याणि अग्रत्रिपुरद्ये
पायं पुण्यं सुखानि वृत्त्यमरः कथ्याः गिरः श्रृण्वन् कुमारेण्यजो मंगलसंविधाभिः मंगलरचनाभिः दृश्यमानं संबंधिनः कन्यादायिनः सद्मसमाससाद १६ ततः सप्तन्निस्त्र अर्चितः पूजितोग्निकल्पो अग्नि
तुल्या भोजपतेः पुरोधाः पुरोहितः पुरोधास्तु पुरोहित इत्यमरः आज्यादिभिर्द्रव्यैरग्निं हुत्वा तमेवाग्निं वैवाहसाक्षिनाथाप्य सार्द्धमांचक्रे इत्यर्थः वधूवरौ संगमयांचकार १७ स राजसूनुः हस्तेन नव
धाः हस्तं परिगृह्य अनंतरा तया सन्निहिता या अशोकलतायाः प्रवालं पल्लवं प्रतिपन्न वेनस्त्रीपेन प्राप्यवतः सहचुततरव भासे १८ वरः कंटकितः पुलकितः प्रकोष्ठो यस्य सो भवत् तन्व्यश्चेतनुहस्तैव

रतिस्मरौ नूनमिमावभूतां राज्ञां सहस्रेषु तथाहि बाला पातेयमात्मप्रतिरूपमेव मनोहि जन्मांतरसंगतिज्ञं १५ इत्युद्धृताः पौरवधूमुखेभ्यः श्रृण्वन्कथाः श्रोत्रसुखाः कुमारः उद्भासितं मंगल
संविधाभिः संबंधिनः सद्म समाससाद १६ ततोवतीर्याशु करेणुकायाः सकामरूपेश्वरदत्तहस्तः वैदर्भनिर्दिष्टमथो विवेश नारीमनांसीव चतुष्कमंतः १७ महार्हसिंहासनसंस्थितोसौ सरत्नमर्घ्यं
मधुमच्च गव्यं भोजोपनीतं च दुकूलयुग्मं जग्राह सार्द्धं वनिताकटाक्षैः १८ दुकूलवासाः स वधूसमीपं निन्ये विनीतैरवरोधरक्षैः वेलासकाशं स्फुटफेनराजिर्नवैरुदन्वानिव चंद्रपादैः १९ तत्रार्चि
तो भोजपतेः पुरोधा हुत्वाग्निमाज्यादिभिरग्निकल्पः तमेव चाधाय विवाहसाक्ष्ये वधूवरौ संगमयांचकार १७ हस्तेन हस्तं परिगृह्य वध्वाः स राजसूनुः सुतरां चकासे अनंतराशोकलताप्रवाले
प्राप्य वचतः प्रतिपल्लवेन १८ आसीद्वरः कंटकितप्रकोष्ठः स्विन्नांगुलिः संववृते कुमारी तस्मिन्द्वये तत्क्षणमात्मवृत्तिः समं विभक्तेव मनोभवस्य १९ रोमांचोद्गमः कंटक इत्यमरः कुमारी स्विन्नांगुलिः सं

ववृते बभूव अत्र तद्दत्तेमामिसमागमेन पारस्परे संस्पर्शेन तयोर्वधूवरयोर्मनोभवस्य वृत्तिः स्थितिः समं विभक्तेव समीकृतेत्यर्थः आकस्मिकस्याप्यनुरागसाम्यं संप्रतिनत्कार्यदर्शनात् पाणिस्पर्शकृत
स्त्वमुत्प्रेक्षते अत्र वात्स्यायनः कन्या तु प्रथमसमागमे स्विन्नांगुलिः स्विन्नमुखी च भवति पुरुषस्तु रोमांचितो भवति एभिर्नयोर्भावं परीक्षेतेति स्त्रीपुरुषयोः स्वेदरोमांचयोरभिधानं सात्विकोक्ति मात्रोपलक्षणं न तु
प्रतिनियमो विवक्षितः एभिरिति कुचचतसान यदिदं वसति कुमारसंभवे रोमोद्गमः प्रादुरभूदुमायाः स्विन्नांगुलिः पुंगवकेतुरासीद् इति युक्तमवचनं न दोषायेति ॥१९॥ श्रीरामायनमः श्रीरामजी ॥ ॥

सर्ग ७

र.टी.म. ७६

पत्तिः पादचारो योधः पदातिं पादचारमभ्यपतत् पादाभ्यामततीति पदातिः पादस्य पदाद्यातिनां पदादेशः पदातिपत्तिपदगपदातिकपदाजय इत्यमरः रथिनः स्यंदनारोहाः अश्वा।
रोहास्तु सादिन इत्यमरः रथिनं रथेशोऽभ्यपतत् तुरंगसादी अश्वारोहस्तुरगाधिरोहमभ्यपतत् गजस्य यंता हस्त्यारोहो गजस्थमभ्यपतत् युद्धं तु तुल्यप्रतिद्वंद्विकानाति सुभटं युद्
ममभूत् द्वंद्वं कलहो युग्ममिति द्वंद्विनो योधाः द्वंद्वं कलहः युग्मयोरित्यमरः ३८ तूर्येषु नदत्सु सत्सु विभाव्यवाचः अनवेक्ष्यगिरः चापभृतो योधा धानुष्काः कुलमुपदिश्यते प्रख्या
प्यते यैस्तान् कुलनामानि नोदीरयंति स्म श्रोतुमशक्यत्वाद्वाचो नाब्रुवन् इत्यर्थः किंतु बाणाक्षरैः बाणपुंखलिखितनामाक्षरैरेव परस्परस्योर्जितं तेजस्विनाम शशंसुः ऊचुः ३५ संयति
संग्रामे अश्वैरुत्थापितः स्यंदनवंशानां रथयूथानां चक्रैः सांद्रीकृतः वंशः पृष्ठाद्यस्थि रोहेऽपि कोशे वेणौ गणे कुले इति केशवः कुंजरकर्णानां तालैः स्फालनैर्विस्तारितो रेणुः नेत्रक्रमेणांशु।
कपरिपाट्या अंशुकेनेत्यर्थः स्याज्जटांशुकयोर्नेत्रं क्रमो विप्लवपरिपाट्योरिति केशवः सूर्यमुपरुरोध छादयामास ३६ वायुवशाद्विदीर्णैर्विवृतैर्मुखैः प्रवृद्धानि ध्वजिनीनां रजांसि से

10

पत्तिः पदातिं रथिनं रथेशस्तुरंगसादी तुरगाधिरूढं यंता गजस्याभ्यपतद्गजस्थं तुल्यप्रतिद्वंद्वि बभूव युद्धं ३४ नदत्सु तूर्येष्वविभाव्यवाचो नोदीरयंति स्म कुलोपदेशान्।
बाणाक्षरैरेव परस्परस्य नामोर्जितं चापभृतः शशंसुः ३५ उत्थापितः संयति रेणुरश्वैः सांद्रीकृतः स्यंदनवंशचक्रैः विस्तारितः कुंजरकर्णतालैर्नेत्रक्रमेणोपरुरोध सूर्यं ३६
ललाटबद्धभ्रुकुटीरंतगैस्तनुत्रजां दंतनिपीडितौष्ठैः आततस्तरेवासानि हुंकारगंभीरवनी शिरोभिः ३७ मत्स्यध्वजा वायुवशाद्विदीर्णैर्मुखैः प्रवृद्धध्वजिनीरजांसि बभुः
पिबंतः परमार्थमत्स्याः पर्याविलानीव नवोदकानि ३८ रथो रथांगध्वनिना विजज्ञे विलोलघंटाक्वणितेन नागः स्वभर्तृनामग्रहणाद्बभूव सांद्रे रजस्यात्मपरावबोधः ३९।

सरेण नृप

वृंतो ग्रंतो मत्स्यध्वजा मत्स्याकारा ध्वजाः पर्याविलानि कलुषाणि नवोदकानि पिबंतः परमार्थमत्स्या इव बभुः ३७ सांद्रे रजसि रथो रथांगध्वनिना चक्रध्वनिना विज्ञातः नागो हस्ती विलोलघंटाक्व
णितेन नादेन विजज्ञे आत्मपराववोधः परस्परविवेकः योधानामिति शेषः स्वभर्तृणां स्वस्वामिनां नामग्रहणान्नामोच्चारणाद्बभूव रजोंधतया स्वपरशब्दादेवानुमाय प्रहरंतीत्यर्थः ॥ ३८ ॥ राम

राम
७६

आरंभसिद्धौ कार्यसिद्धिविषये पूर्वं कृतसंविद् कृतपूर्वसंवित् समयोपलभ्यं कृतपूर्वसंविभिः संकेतो मार्गविरोधविषयो येन स तथोक्तः संवित् युद्धप्रतिज्ञा यां संकेतो चारनामसु इति केशवः ।
स राजलोकः समरोपलभ्यं अजग्रस्तान् कालल्लभ्यं तदा तस्यैव काचित्त्वादिति भावः समरोपलभ्यमिति पाठे युद्धसाध्यमित्यर्थः तत्रामदे वामिषं भोग्य वस्तु प्रमदामिषं च स्त्रियो ।
मांसे तथा स्याद्भोग्य वस्तुनीति केशवः आदास्यमानो ग्रहीष्यन् अजस्य पंथानमावृत्य तस्थौ २८ अनुष्ठितः अनंतरजायाः अनुजायाः विवाहो येन स तथोक्तः क्रथकैशि
कानामधिपो विदर्भेश्वरोपि तावत् सत्त्वानुरूपमुत्साहानुरूपं यथा तथा हरणीकृतं पारिबर्हं धनं येन स तथा हरणं च तदित्यमरः हरणीकृतश्रीः सन् राघवमजं प्रस्थापयत
स्थापितवान् अन्वगाच्च २९ कुंडिनं विदर्भनगरं तस्येशो भोजः त्रिषु लोकेषु प्रथितेनाजेन सार्धं मार्गे तिस्रो वसतीरुषित्वा वसतिः रात्रिवेश्मनोरित्यमरः काल ... पर्वात्यये द्वितीयापर्व
सपेदर्शे उष्णरश्मेः सूर्यात् सोमश्चंद्र इव तस्मादपावर्तत निवृत्त इत्यर्थः ३० नृपाः प्रागपि प्रथमं ... दिग्विजये कोशलेंद्रे प्रमन्यवो रूढवैरा बभूवुः ततो हेतोः समे

स राजलोकः कृतपूर्वसंविदारंभसिद्धौ समरोपलभ्यं आदास्यमानः प्रमदामिषं तदावृत्य पंथानमजस्य तस्थौ २८ भर्तापि तावत् क्रथकैशिकानामनुष्ठितानंतरजाविवाहः सत्ता
नुरूपं हरणीकृतश्रीः प्रस्थापयद्राघवमन्वगाच्च २९ तिस्रस्त्रिलोकप्रथितेन सार्धमजेन मार्गे वसतीरुषित्वा तस्मादपावर्तत कुंडिनेशः पर्वात्यये सोम इवोष्णरश्मेः ३० प्रमन्य
वः प्रागपि कोशलेंद्रे प्रत्येकमात्तस्वतया बभूवुः अतो नृपाश्चक्षमिरे समेताः स्त्रीरत्नलाभं न तदात्मजस्य ३१ तमुद्वहंतं पथि भोजकन्यां रुरोध राजन्यगणः स दृप्तः बलिप्रदिष्टां श्रियमा
ददानं त्रैविक्रमं पादमिवेंद्रशत्रुः ३२ तस्याः स रक्षार्थमनल्पयोधमादिश्य पित्र्यं सचिवं कुमारः प्रत्यग्रहीत्पार्थिववाहिनीं तां भागीरथीं शोण इवोत्तरंगः ३३ ताः संगताः संतस्तदात्मजस्य

रघुसूनोः स्त्रीरत्नलाभं न चक्षमिरे न सेहिरे ३१ दृप्तः स राजन्यगणो राजसंघातो भोजकन्यामुद्वहंतं नयंतं तमजं बलिप्रदिष्टां बलिना दत्तां श्रियमा
माददानं श्रियं । त्रीन् विक्रमान् त्रिविक्रमस्येमं त्रैविक्रमं पादमिंद्रशत्रुः प्रह्लाद इव पथि रुरोध न तथावान् प्रह्लादो विरोधं कृतवानिति भावः प्रह्लादः श्रोकांतस्मारन्नपि
माददानं श्रियं । ... ... ३२ स कुमारोऽजस्तस्याः इंदुमत्या रक्षार्थमनल्पयोधं बहुसुभटं पित्र्यं पितुरागतं सचिवमादिश्य आज्ञा
प्य तां पार्थिववाहिनीं राजसेनां ध्वजिनी वाहिनी सेनेत्यमरः भागीरथीमुत्तरंगः शोणः शोणाख्यो नद इव प्रत्यग्रहीत् ... प्रतिगृहीतवान् ३३

र. टी. स. ७ ।तनुत्रभाजां तनुत्रं निस्त्राणं विमर्शः वर्मभृतां कवचानां संबंधिभिः बृहत्सु दंतेषु पतद्भिः विकोशैः पिधानाद्बहिष्कृतैः कोशोस्त्री कुड्मले खड्गपिधानेर्थौघदिव्ययोरित्यमरः असिभिरुद्भूतमुच्छ्रितम। सर्ग ७
ग्निं विविग्ना भीता गजाः करशीकरेण शमयांचक्रुः ४६ शिलीमुखैर्बाणैरुत्कृत्तानि शिरांस्येव फलानि तैराढ्या च्युतैर्निपन्नाः शुभैः शिरस्त्रैः शिरांसि त्रायंत इति शिरस्त्राणि शीर्षण्यं च शिरस्के चेत्यमरः शो।
णितान्येव मद्यं तस्य कुल्याः प्रवाहाः यस्यां सा कुल्याकृत्रिमा सरिदित्यमरः रणक्षितिर्मृत्योः पानभूमिरिव रराज ४७ उपांतयोः प्रांतयोर्विहंगैर्निःकुषितं तुंडैर्निःशेषितं इति निष्कुषितमिति छांदसः भुजच्छेद
भुजखंडं तेभ्यः आक्षिप्य आच्छिद्य पिशितप्रियामांसप्रिया शिवा क्रोष्ट्री शिवः कीलः शिवा क्रोष्ट्री इति विश्वः क्लिन्नां शिवामरिमायुर्गोमायुमृगधूर्तकाः शृगालवंचकक्रोष्टुफेरुफेरवजंबुका इत्यमरः
केयूरकोटिक्षततालुदेशा यस्याः सा सती अपाचकार अपसारयामास किरतेः करोतेर्वा लिट् ४८ द्विषत्खड्गेन हृतोत्तमांगः छिन्नशिराः कश्चिद्वीरः सद्यो विमानप्रभुतां विमानाधिपत्यमुपेत्य वामांग
संसक्ता सव्यांगसंगिनी सुरांगना यस्य स तथोक्तः सन् समरे नृत्यत्स्वं कबंधं अशिरस्कं कलेवरं ददर्श कबंधोस्त्री क्रियायुक्तमपमूर्धकलेवरमित्यमरः ४९ कौचिद्वीरौ अन्योन्यस्य सूतयोः सा

त्सुरुभाजां वर्मभृतां विकोशैर्बृहत्सु दंतेष्वसिभिः पतद्भिः उद्यंतमग्निं शमयांबभूवुर्गजा विविग्नाः करशीकरेण ४६ शिलीमुखोत्कृत्तशिरःफलाढ्या च्युतैः शिरस्त्रैश्चषकोत्तरेव रणक्षितिः।
शोणितमद्यकुल्या रराज मृत्योरिव पानभूमिः ४७ उपांतयोर्निष्कुषितं विहंगैराक्षिप्य तेभ्यः पिशितप्रियापि केयूरकोटिक्षततालुदेशा शिवा भुजच्छेदमपाचकार ४८ कश्चिद्द्विषत्खड्गहृ॥
तोत्तमांगः सद्यो विमानप्रभुतामुपेत्य वामांगसंसक्तसुरांगनः स्वं नृत्यत्कबंधं समरे ददर्श ४९ अन्योन्यसूतोन्मथनादभूतां तावेव सूतौ रथिनौ च कौचित् व्यश्वौ गदाव्यायतसंप्रहारौ
भग्नायुधौ बाहुविमर्दनिष्ठौ ५० परस्परेण क्षतयोः प्रहर्त्रोरुत्क्रांतवाय्वोः समकालमेव अमर्त्यभावेपि कयोश्चिदासीदेकाप्सरःप्रार्थितयोर्विवादः ५१ रथ्योरुन्मथनान्निधनात्तावे

व सूतौ रथिनावभूतां व्यश्वौ नष्टाश्वौ सन्तौ गदाभ्यां व्यायतो दीर्घः संप्रहारो युद्धं ययोस्तौ अभूतां ततो भग्नायुधौ भग्नगदौ सन्तौ बाहुविमर्दे निष्ठा ययोस्तौ बाहुयुद्धसक्तावभूताम् ५० परस्परेण क्षतयोः समकालमेकास्मि
न्नेव यथा तथोत्क्रांतवाय्वोर्युगपदुत्क्रांतप्राणयोरेकाप्सरःप्रार्थितयोः प्रार्थिता एकाप्सरसो यैरित्यर्थः वाहिताग्न्यादिषु इति परनिपातः अथवा एकस्याप्सरसि प्रार्थितं प्रार्थना ययोरिति विग्रहः क्लिन्नंबुध्य राम ११
प्सरस इति वक्तव्याभिधानं शापकाभिप्रायं कयोश्चिद्योधयोरमर्त्यभावेपि देवभूयेपि विवादः कलहः आसीत् कोपेमिथामिलाषो हि महद्वैरबीजमित्यर्थः ॥५१॥श्रीरामजी॥ ॥॥

लोचनमार्गमावृण्वतो रोधिपचमुपरं धतः आजौ विजृंभितस्य रजोंधकारं तस्मात् शस्त्रक्षताश्वद्विपवीरजन्मा यस्य स रुधिरप्रवाहः बालारुणोऽभूत् अरुणो भास्करेपि स्यादित्यमरः बाल।
विशेषणं च पित्सावर्णार्थं ४२ स च्छिन्नमूलः रुधिरेण छिन्नमूलः तस्याजितमूलत्वं संबंध इत्यर्थः तस्य रुधिरस्योपरिष्टात् पवनेनावधूतो वाला रेणुः अंगारशेषस्य हुताशनस्य पूर्वोत्थितो धूम
इवाबभासे ४३ रथिनः प्रहारेण या मूर्छा तस्यापगमे सति रथस्थाः रथगा अपि तावत्संरक्षिता इत्यर्थः मूर्छितानामन्यत्र नीत्वा संरक्षणमिति सारथिधर्मः यंतॄन् सारथीन् उपालभ्य साधुक
तमित्यधिक्षिप्य विवर्तिताश्वाः संतः पूर्वं यैः सादिताः स्वयं लक्षितपूर्वकेतून् पूर्वदृष्टैः केतुभिः प्रत्यभिज्ञातानित्यर्थः तानेव सामर्षतया निजघ्नुः ४४ अर्धमार्गे इति विग्रहः तस्मिन्न
र्धमार्गे परेषां बाणैर्लूनाः छिन्ना अपि हस्तवतां कृतहस्तानां धनुर्भृतां पृषत्काः बाणाः आत्मजवानुवृत्त्या स्ववेगानुबंधेन हेतुना फलिभिः फलवद्भिः शस्य वा शराग्रयोः फलमिति विश्वः अर्धे चेते
भागाश्च पूर्वार्धभागैः फलोत्तीतिशरः शरव्यं लक्ष्यं उपशब्दादिभ्यो यदिति प्रत्ययः संप्रापुरेवेत्यर्थः ४५ गजसन्निपाते गजयुद्धे निशितैस्तीक्ष्णैः

आवृण्वतो लोचनमार्गमाजौ रजोंधकारस्य विजृंभितस्य शस्त्रक्षताश्वद्विपवीरजन्मा बालारुणोऽभूद्रुधिरप्रवाहः ४२ स च्छिन्नमूलः क्षतजेन रेणुस्तस्योपरिष्टात्पवनावधूतः अंगा
रशेषस्य हुताशनस्य पूर्वोत्थितो धूम इवाबभासे ४३ प्रहारमूर्छापगमे रथस्था यंतॄनुपालभ्य निवर्तिताश्वाः यैः सादिता लक्षितपूर्वकेतूंस्तानेव सामर्षतया निजघ्नुः ४४ अप्यर्धमार्गे प
रबाणलूना धनुर्भृतां हस्तवतां पृषत्काः संप्रापुरेवात्मजवानुवृत्त्या पूर्वार्धभागैः फलिभिः शरव्यं ४५ आधोरणानां गजसन्निपाते शिरांसि चक्रैर्निशितैः क्षुराग्रैः हृतान्यपि श्येननखाग्र
कोटिव्यासक्तकेशानि चिरेण पेतुः ४६ पूर्वं प्रहर्ता न जघान भूयः प्रतिप्रहाराक्षममश्वसादी तुरंगमस्कंधनिषण्णदेहं प्रत्याश्वसंतं रिपुमाचकांक्ष ४७ क्षुरस्येवाग्रं येषां तैः क्षुराग्रैश्चक्रैः आयुधवि

शेषैः हृतानि छिन्नान्यपि श्येनानां पक्षिविशेषाणां नखाग्रकोटिषु व्यासक्ताः केशा येषां तानि आधोरणानां हस्त्यारोहाणां आधोरणा हस्तिपका हस्त्यारोहा निषादिन इत्यमरः शिरांसि चिरेण पेतुः श्येनपा
तावच्छ्रागेवाहृत्य पश्चादुत्सृजंतीति पदित्वां न रोषु केशसंसक्तस्थिरत्वात् चिरेणेत्यर्थः ४६ पूर्वं प्रहर्ता प्रथमं प्रहर्ता अश्वसादी प्रतिप्रहाराक्षमं तुरंगमस्कंधे निषण्णदेहं मूर्छितमि
त्यर्थः रिपुं भूयो न जघान पुनर्न प्रजहार किंतु प्रत्याश्वसंतं पुनरुज्जीवंतं आचकांक्ष स नाप्युद्व्यसनं नार्तं नतिपरिक्षणमिति निर्मोधादिति भावः ॥४७॥ श्रीरामश्री ॥ ॥ श्री ॥ ॥

सर्ग

र.टी.म. ७२

अधिराजसूनुर्महाराजपुत्रः कुसुमास्त्रकान्तो मदनसुंदरः स्वप्ननिवृत्तलौल्यो विलासाभावरूवान्त्वर्थः असौ कुमारः प्रियंवदात्प्राप्तं गान्धर्वदिव्यास्त्रं गान्धर्वं गन्धर्वदेवताकं प्रस्वापयतीति प्रस्वापनं
निद्राजनकमस्त्रं राजसु प्रायुंक्त प्रयुक्तवान् ५८ ततो धनुःकर्षणमूढहस्तमव्यापारहस्तमेकांसपर्यस्तशिरस्त्रजालं पर्यस्तं ध्वजस्तम्भेषु निषण्णा अवष्टब्धा देहा यस्य तत् नरदेवानां राज्ञां सैन्यं से
न्यं चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् प्रत्ययः निद्राविधेयं निद्रापरतंत्रमित्यर्थः तस्थौ ५९ ततः कुमारः प्रियायाः इंदुमत्या उपात्तरसे आस्वादितमाधुर्ये अतिश्लाघ्य इति भावः अधरोष्ठे जलजं शंखं नि
वेश्य जलजं शंखं प्रयतो रीतिविश्वः दध्मौ मुखवातेन पूरयामास येन शंखेन स एकवीरः सः स्वहस्तार्जितं मूर्तं मूर्तिमद्यशः पिबन्निवाबभासे यशासैः पुष्ट इवादितिभावः ६० शंखस्वना
भिज्ञं शंखध्वनेरभिज्ञया अस्वमित्रानत्वान्निवृत्ताः प्राक्पलाय्य संप्रत्यागताः स्वयोधाः सन्नशत्रुं निद्राणशत्रुं तमजं निमीलितानां मुकुलितानां पंकजानां मध्ये स्फुरंतं प्रतिमाचासौ शशांकश्चेति

12

प्रियंवदात्प्राप्तमसौ कुमारः प्रायुंक्त राजस्वधिराजसूनुः गांधर्वमस्त्रं कुसुमास्त्रकांतः प्रस्वापनं स्वप्ननिवृत्तलौल्यः ५८ ततो धनुःकर्षणमूढहस्तमेकांसपर्यस्तशिरस्त्रजालं तस्थौ ध्व।
जस्तंभनिषण्णदेहं निद्राविधेयं नरदेवसैन्यं ५९ ततः प्रियोपात्तरसेऽधरोष्ठे निवेश्य दध्मौ जलजं कुमारः तेन स्वहस्तार्जितमेकवीरः पिबन्यशो मूर्तमिवाबभासे ६० शंखस्वनाभिज्ञतया।
निवृत्तास्तं छिन्नशत्रुं ददृशुः स्वयोधाः निमीलितानामिव पंकजानां मध्ये स्फुरंतं प्रतिमाशशांकं ६१ सशोणितैस्तेन शिलीमुखाग्रैर्निक्षेपिताः केतुषु पार्थिवानां यशो हृतं संप्रति राघवेण
न जीवितं वः कृपयेति वर्णाः ६२ स चापकोटीनिहितैकबाहुः शिरस्त्रनिष्कर्षणभिन्नमौलिः ललाटबद्धश्रमवारिबिंदुर्भीतां प्रियामेत्य वचो बभाषे ६३ इतः परानर्भकहार्यशस्त्रान्वैदर्भि पश्या
नुमता मयासि एवंविधेनाहवचेष्टितेन त्वं प्रार्थ्यसे हस्तगता ममैभिः ६४ प्रतिमाशशांकं प्रतिबिंबचंद्रमिव ददृशुः ६१ संप्रति राघवेण रघुपुत्रेण एवं रघुरोधिनेति भावः हे राजानः वो युष्माकं यशो हृतं न

जीवितं कृपया न हृतं न त्वशक्त्येति भावः इत्येवंरूपा वर्णाः एतदर्थप्रतिपादकं वाक्यमित्यर्थः सशोणितैः शोणितादग्धैः शिलीमुखाग्रैर्बाणाग्रैः आत्मनैस्तेन अजेन प्रयोजककर्त्रा पार्थिवानां केतुषु निक्षेपिताः
प्रयोज्यैरन्यैर्निवेशिता वलेलिखिता इत्यर्थः क्षिपेर्ण्यंताव्कर्मणि क्तः ६२ चापकोट्यां निहित एको बाहुर्येन सः शिरस्त्रस्य निःकर्षणेनापनयनेन भिन्नमौलिः श्लथकेशबंधः ललाटबद्धाः श्रमवारिबिंदवो य
स्य सः सोऽजो भीतां प्रियामिंदुमतीमेत्यासाद्य वचो बभाषे ६३ हे वैदर्भि इतः इदानीमर्भकहार्यशस्त्रान्बालकापहार्यायुधान्परान्शत्रून्पश्य मयानुमतासि इष्टुमितिशेषः एभिर्दपैरेवंविधेन निद्रावस्थस्वे
ष्टितेन रणकर्मणा मम हस्तगता हस्तगतवती दुर्ग्रहेत्यर्थः त्वं प्रार्थ्यसेऽपजिहीर्ष्यसे इत्यर्थः एवंविधेनेत्यत्र स्वरुसेन निर्दिशन्मोपहासेन्वाहेति द्रष्टव्यं ॥ ६४॥ श्रीसरस्वत्यै नमः श्रीरामश्री

राम ७२

तावुभौ व्यूहौ सेनासंघौ व्यूहस्तु बलविन्यास इत्यमरः पश्चात्पुरश्च यौ मारुतौ तयोः पर्यायवृत्त्या प्रवृद्धौ महार्णवोर्मी इव इतरेतरस्मादन्योन्यस्मादव्यवस्थं व्यवस्थारहितं अनियतं जयं भेजतुः।
चापतुः प्रापतुः ५१ बले स्वसैन्ये परेण बलेन भग्नेऽपि महौजा महाबलोऽजः अरिसैन्यं प्रत्येव ययौ तथाहि धूमः समीरणेन वायुना यत्र निवर्त्येत कक्षादपसार्येत वर्तते तत्रैव ततः कक्षो वीरुधि तृणे च वह्निः।
स्युरतोऽपत्रं कक्षस्त्वन्तःकक्षोऽनुतृणवीरुधाविल्यमरः तत्र एव तत्रैव प्रवर्तते इति शेषः सार्वविभक्तिकस्तसिल् ५२ रथी रथिकः निषङ्गी तूणवान् तूणोपासंगतूणीरनिषंगा इषुधिर्द्वयोरित्यमरः प
धनुष्मान् धनुर्धरः दृप्तोऽरणदृप्तः एकवीरः असहायः शूरः सोऽजः राजन्यकं राजसमूहं गोत्रोक्षेत्यादिना वुञ्प्रत्ययः महावराहः कल्पक्षये कल्पान्ते उद्वृत्तमर्णवांभ इव निवारयामास ५३ सोऽजः
आजौ संग्रामे दक्षिणं हस्तं तूणमुखेन निषंगविवरेण वाममतिसुंदरं वा मं सव्यं प्रतीपे च दक्षिणो चातिसुंदर इति विश्वः व्यापारयन् तु तथा वसंधानादयमस्तु दुर्लक्षो हस्तमकुंदाकर्षकश्च योद्धुरस्य मौ
र्वीव इषून्धीतिरिपु घ्नान् सान्मनुष्यकर्तृके चेति क प्रत्ययः बाणान् सुषुवे किमु ५४ सोऽजः रोषदष्टाः अत एव अधिकलोहिता ओष्ठा येषां तैर्व्यक्ता ऊर्ध्वरेखा यासां ता भ्रुकुटीर्भंगान् वहद्भिः

अथोभुभौ ताविति तरेतरस्मात् जयं तथा तुल्यवस्थं पश्चात्पुरो मारुतयोः प्रवृद्धौ पर्यायवृत्त्येव महार्णवोर्मी ५१ परेण भग्नेऽपि बले महौजा ययावजः प्रत्यरिसैन्यमेव धूमो निवर्त्येत समीरणेन
यतस्तु कक्षस्तत एव वह्निः ५२ रथी निषंगी कवची धनुष्मान् दृप्तः स राजन्यकमेकवीरः विलोडयामास महावराहः कल्पक्षयोद्वृत्तमिवार्णवांभः ५३ स दक्षिणं तूणमुखेन वामं व्यापारयन् क २
हस्तमलक्ष्यताजौ आकर्णकृष्टा सकृदस्य योद्धुर्मौर्वीव बाणान्सुषुवे रिपुघ्नान् ५४ स रोषदष्टाधरलोहितोष्ठैर्व्यक्तोर्ध्वरेखा भ्रुकुटीर्वहद्भिः तस्तार गां भल्लनिकृत्तकंठैर्हुंकारगर्भैर्द्विष
तां शिरोभिः ५५ सर्वैर्बलांगैर्द्विरदप्रधानैः सर्वायुधैः कंटकभेदिभिश्च सर्वप्रयत्नेन च भूमिपालास्तस्मिन्प्रजह्रुर्युधि सर्व एव ५६ सोऽस्त्रव्रजैश्छन्नरथः परेषां ध्वजाग्रमात्रेण बभूव लक्ष्यः
नीहारमग्नो दिनपूर्वभागः किंचित्प्रकाशेन विवस्वतेव ५७

भल्लनिकृत्ताः बाणविशेषच्छिन्नाः कंठा येषां तैर्हुंकारगर्भैः संकुद्धैर्द्विषतां शिरोभिः भूमिं तस्तार छादयामास ५५ द्विरदप्रधानैर्गजमुख्यैः
सर्वैर्बलांगैः सेनांगैः हस्त्यश्वरथपादातं सेनांगं स्याच्चतुष्टयमित्यमरः सर्वायुधैः कंटकभेदिभिश्च कवचभेदिभिश्चाशेषैः तस्मिन्नाह सर्वप्रयत्नेन च सर्व एव भूमिपालाः युधि तस्मिन्नजे प्रजह्रुः प्रजह्रुरित्यर्थः सर्वेभ्यः सर्वकारक
शक्तिसंभवात् कर्मणोऽप्यधिकरणविवक्षायां सप्तमी तदुक्तं अनेकशक्तियुक्तस्य विश्वस्यानेककर्मणः सर्वदा सर्वथाभावात् क्वचित्किंचिद्विवक्ष्यते इति ५६ सोऽजः परेषां अस्त्रव्रजैश्छन्नरथोऽपिहितरथः नीहारमग्नो दिनपूर्वभागः
प्रातःकालः किंचित्प्रकाशेन ईषत्प्रकाशेन विवस्वतेव ध्वजाग्रमात्रेण लक्ष्यो बभूव ध्वजाग्रदन्यत्र न किंचिल्लक्ष्यत इत्यर्थः ॥५७॥ अथास्त्रः

र. टी. ७

प्रतिद्वंद्विभवात् रिपुसत्त्वाद्विषादात् खेदात् सद्यो विमुक्तं तस्या मुखं निःश्वासो वाष्पः उष्मा वाष्पेनेत्र जलो अस्योति विग्रहः तस्यापगमाद्धेतोरात्मीयं प्रसादं नैर्मल्यं प्रपन्नः प्राप्तः आत्मस्वरूपं
दृश्यतेऽनेनेति आत्मदर्श इव बभासे ॥ ६५ ॥ सा इंदुमती हृष्टापि पत्युः पौरुषेण प्रमुदितापि ह्रिया विजिता यतः प्रियमजं साक्षात्स्वयं नाभ्यनंदत् न प्रशशंस किंतु न वैरंभः पृषतैरंभोविंदुभिरवृष्टा सिक्ता
स्थली अकृत्रिमा भूमिः जानपदकुंडगोणस्थलेत्यादिनाकृत्रिमार्थे ङीप्रत्ययः अभ्रवृंदं मेघसमूहं मयूरकेकाभिरिव सखीनां वाग्भिरभ्यनंदत् ॥ ६६ ॥ नो पतेनो अवतद्यसेवा पंगर्हा अवद्यपण्येत्यादिना नि
पातः कुत्सितावद्यखेटगर्ह्याणकाः समाइत्यमरः तस्मादपेतो निर्दोष इत्यर्थः सोऽजः इति राज्ञां शिरसि वामं पादमाधाय अनवद्यां अदोषां इंदुमतीमुदवहत् उपानयत् आत्मसात् अकारोदित्यर्थः अ

तस्याः प्रतिद्वंद्विभवाद्विषादात्सद्यो विमुक्तं मुखमाबभासे निःश्वासवाष्पापगमात्प्रपन्नः प्रसादमात्मीयमिवात्मदर्शः ॥ ६५ ॥ हृष्टापि सा ह्रीविजिता ।
न साक्षाद्वाग्भिः सखीनां प्रियमभ्यनंदत् स्थली नवांभःपृषताभिवृष्टा मयूरकेकाभिरिवाभ्रजालं ॥ ६६ ॥ इति शिरसि स वामं पादमाधाय राज्ञामु ।
दवहदनवद्यां तामवद्यादपेतः रथतुरगरजोभिस्तस्य रूक्षालकाग्रा समरविजयलक्ष्मीः सैव मूर्ता बभूव ॥ ६७ ॥ प्रथमपरिगतार्थस्तं रघुः संनिवृत्तं विज ।
यिनमभिनंद्य श्लाघ्यजायासमेतं तदुपहितकुटुंबः शांतिमार्गोत्सुकोऽभून्न हि सति कुलधुर्ये सूर्यवंश्या गृहाय ॥ ६८ ॥ इति श्रीरघुवंशे महाकाव्ये कवि
कालिदासकृतौ अजपाणिग्रहणो नाम सप्तमः सर्गः ॥ ७ ॥ पमर्थस्तत्सुहृदं तं पथि भोजकन्याभिः सह अजनस्थितिः तस्य अजस्य रथतुरगरजोभिः रूक्षाणि परुषाणि अलकाग्राणि यस्याः
सा इंदुमत्येव मूर्ता मूर्तिमती समरविजयलक्ष्मीर्बभूव रणलब्धत्वादन्यः कोऽपि विजयलाभ इत्यर्थः ॥ ६७ ॥ प्रथममागमनात्प्रागेव परिगतो ज्ञातोऽर्थो विवाहरूपो येन सः प्रथमपरिगतार्थः रघुर्विजयिनं श्ला
घ्यजायासमेतं संनिवृत्तं प्रत्यागतं तमजमभिनंद्य तस्मिन्नजे उपहितं कुटुंबः सन् शांतिमार्गे मोक्षमार्गे उत्सुकोऽभूत् तथाहि कुलधुर्ये कुलधुरंधरे सति सूर्यवंश्या गृहाय गृहस्थाश्रमाय न भवं
ति ॥ ६८ ॥ इति श्रीपदवाक्यप्रमाणपारावारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां रघुवंशटीकायां संजीविनीनाम समाख्यायां सप्तमः सर्गः ॥ ७ ॥ श्रीराम ॥ ॥

13

राम ७

Acc 103

१०३

Acc - 103

14